द्वितीयः पाठः

## काक-शृगाल्योः कथा

(लङ्लकारः)

एकदा एकः काकः बुभुक्षितः आसीत्। भोजनं प्राप्तुं सः इतस्ततः अभ्रमत्। सहसा सः एकां रोटिकां प्राप्तवान्। सः एकस्य वृक्षस्य शाखायाः उपरि उपाविशत् तां रोटिकां खादितुं चअचिन्तयत्। तदैव एका शृगाली काकं रोटिकाम् च अपश्यत्। सा तां रोटिकां प्राप्तुं मनसि अचिन्तयत्। सा तस्यैव वृक्षस्य अधः अतिष्ठत् यस्य उपरि काकः उपविष्टः आसीत्।



शृगाली काकम् अवदत्-भो काक ! त्वम् अतीव सुन्दरः असि। तव वर्णः मोहकः अस्ति। तव पक्षौ मनोहरौ स्तः। तव ध्वनिः अतीव मधुरः अस्ति। तव ध्वनिं श्रुत्वा मम कर्णौ तृप्तौ भवतः। स्वप्रशंसां श्रुत्वा काकः अतिप्रसन्नः अभवत्। यदैव सः 'काँव्-काँव्' इति ध्वनिं कर्तुम् आरभत तदा तस्य मुखात् रोटिका भूमौ अपतत्। एतदर्थम् एव शृगाली तस्य प्रशंसाम् अकरोत्। सा शीघ्रम् एव रोटिकां गृहीत्वा तस्मात् स्थानात् पलायिता अखादत् च।

### शब्दार्थ

**एकदा**=एक बार। **बुभुक्षितः**=भूखा। **इतस्ततः**=इधर-उधर। **सहसा**=अचानक। **शाखायाः**=डाल के। **उपरि**=ऊपर। **उपाविशत्**=बैठ गया। **शृगाली**=सियारिन, लोमड़ी । **प्राप्तुम्**=प्राप्त करने के लिए। **श्रुत्वा**=सुनकर। **पलायिता**=भाग गयी।

अभ्यास

1. उच्चारण करें-

बुभुक्षितः शाखायाः अचिन्तयत् पक्षौ स्वप्रशंसाम् उपविष्टः

2. एक पद में उत्तर दंे -

(क) कः बुभुक्षितः आसीत् ?

(ख) सहसा काकः किं प्राप्तवान् ?

(ग) शृगाली किं प्राप्तुं मनसि अचिन्तयत् ?

(घ) कस्य मुखात् रोटिका भूमौ अपतत् ?

3. पाठ के पदों से रिक्त स्थानों की पूर्ति करें -

(क) एकः काकः ...................... आसीत्।

(ख) सः इतस्ततः ............................ ।

(ग) स्वप्रशंसां श्रुत्वा काकः ........................ अभवत्।

(घ) एतदर्थमेव शृगाली तस्य .......................... अकरोत्।

(ङ) सा रोटिकां गृहीत्वा .......................... पलायिता।

4. निम्नलिखित पदों का अपने वाक्यों में प्रयोग करें -

भोजनम्, अपतत्, रोटिकाम्, सुन्दरौ।

5. निम्नलिखित पदों को मिलाकर लिखें -

काकम् + अवदत् = .......................................।

तद् + उपरि = .......................................।

एतद् + अर्थमेव = .......................................।

प्रशंसाम् + अकरोत् = .......................................।

6. संस्कृत में अनुवाद करें -

(क) एक कौआ भूखा था।

(ख) उसने एक रोटी पायी।

(ग) कौआ पेड़ की डाल पर बैठा था।

(घ) शृगाली बोली-तुम बहुत सुन्दर हो।

**शिक्षण-संकेत**

कौवे एवं लोमड़ी की कथा को अपने शब्दों में लिखने का अवसर दें।

**"अतिथि देवो भव।"**